23

दमयन्त्युवाच।

गच्छ केशिनि जानीहि क एष रथवाहकः।

उपविष्टो रथोपस्थे विकृतो ह्रस्वबाहुकः॥ ३-७२-१॥

अभ्येत्य कुशलं भद्रे मृदुपूर्वं समाहिता।

पृच्छेथाः पुरुषं ह्येनं यथातत्त्वमनिन्दिते॥ ३-७२-२॥

अत्र मे महती शङ्का भवेदेष नलो नृपः।

तथा च मे मनस्तुष्टिर्हृदयस्य च निर्वृतिः॥ ३-७२-३॥

ब्रूयाश्चैनं कथान्ते त्वं पर्णादवचनं यथा।

प्रतिवाक्यं च सुश्रोणि बुध्येथास्त्वमनिन्दिते॥ ३-७२-४॥

बृहदश्व उवाच।

एवं समाहिता गत्वा दूती बाहुकमब्रवीत्।

दमयन्त्यपि कल्याणी प्रासादस्थान्ववैक्षत॥ ३-७२-५॥

केशिन्युवाच।

स्वागतं ते मनुष्येन्द्र कुशलं ते ब्रवीम्यहम्।

दमयन्त्या वचः साधु निबोध पुरुषर्षभ॥ ३-७२-६॥

कदा वै प्रस्थिता यूयं किमर्थमिह चागताः।

तत्त्वं ब्रूहि यथान्यायं वैदर्भी श्रोतुमिच्छति॥ ३-७२-७॥

बाहुक उवाच।

श्रुतः स्वयंवरो राज्ञा कौसल्येन यशस्विना।

द्वितीयो दमयन्त्या वै श्वोभूत इति भामिनि॥ ३-७२-८॥

श्रुत्वा तं प्रस्थितो राजा शतयोजनयायिभिः।

हयैर्वातजवैर्मुख्यैरहमस्य च सारथिः॥ ३-७२-९॥

केशिन्युवाच।

अथ यो ऽसौ तृतीयो वः स कुतः कस्य वा पुनः।

त्वं च कस्य कथं चेदं त्वयि कर्म समाहितम्॥ ३-७२-१०॥

बाहुक उवाच।

पुण्यश्लोकस्य वै सूतो वार्ष्णेय इति विश्रुतः।

स नले विद्रुते भद्रे भाङ्गस्वरिमुपस्थितः॥ ३-७२-११॥

अहमप्यश्वकुशलः सूदत्वे च सुनिष्ठितः।
ऋतुपर्णेन सारथ्ये भोजने च वृतः स्वयम्॥ ३-७२-१२॥
केशिन्युवाच।
अथ जानाति वार्ष्णेयः क्व नु राजा नलो गतः।
कथंचित्त्वयि वैतेन कथितं स्यात्तु बाहुक॥ ३-७२-१३॥
बाहुक उवाच।
इहैव पुत्रौ निक्षिप्य नलस्याशुभकर्मणः।
गतस्ततो यथाकामं नैष जानाति नैषधम्॥ ३-७२-१४॥
न चान्यः पुरुषः कश्चिन्नलं वेत्ति यशस्विनि।
गूढश्चरति लोके ऽस्मिन्नष्टरूपो महीपतिः॥ ३-७२-१५॥
आत्मैव हि नलं वेत्ति या चास्य तदनन्तरा।
न हि वै तानि लिङ्गानि नलं शंसन्ति कर्हिचित्॥ ३-७२-१६॥
केशिन्युवाच।
यो ऽसावयोध्यां प्रथमं गतवान्ब्राह्मणस्तदा।
इमानि नारीवाक्यानि कथयानः पुनः पुनः॥ ३-७२-१७॥
क्व नु त्वं कितव छित्त्वा वस्त्रार्धं प्रस्थितो मम।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय॥ ३-७२-१८॥
सा वै यथा समादिष्टा तत्रास्ते त्वत्प्रतीक्षिणी।
दह्यमाना दिवारात्रं वस्त्रार्धेनाभिसंवृता॥ ३-७२-१९॥
तस्या रुदन्त्याः सततं तेन दुःखेन पार्थिव।
प्रसादं कुरु वै वीर प्रतिवाक्यं प्रयच्छ च॥ ३-७२-२०॥
तस्यास्तत्प्रियमाख्यानं प्रब्रवीहि महामते।
तदेव वाक्यं वैदर्भी श्रोतुमिच्छत्यनिन्दिता॥ ३-७२-२१॥
एतच्छ्रुत्वा प्रतिवचस्तस्य दत्तं त्वया किल।
यत्पुरा तत्पुनस्त्वत्तो वैदर्भी श्रोतुमिच्छति॥ ३-७२-२२॥
बृहदश्व उवाच।
एवमुक्तस्य केशिन्या नलस्य कुरुनन्दन।
हृदयं व्यथितं चासीदश्रुपूर्णे च लोचने॥ ३-७२-२३॥
स निगृह्यात्मनो दुःखं दह्यमानो महीपतिः।
बाष्पसंदिग्धया वाचा पुनरेवेदमब्रवीत्॥ ३-७२-२४॥

वैषम्यमपि संप्राप्ता गोपायन्ति कुलस्त्रियः।

आत्मानमात्मना सत्यो जितस्वर्गा न संशयः॥ ३-७२-२५॥

रहिता भर्तृभिश्चैव न क्रुध्यन्ति कदाचन।

प्राणांश्चारित्रकवचा धारयन्तीह सत्स्त्रियः॥ ३-७२-२६॥

प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः।

आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति॥ ३-७२-२७॥

सत्कृतासत्कृता वापि पतिं दृष्ट्वा तथागतम्।

भ्रष्टराज्यं श्रिया हीनं क्षुधितं व्यसनाप्लुतम्॥ ३-७२-२८॥

एवं ब्रुवाणस्तद्वाक्यं नलः परमदुःखितः।

न बाष्पमशकत्सोढुं प्ररुरोद च भारत॥ ३-७२-२९॥

ततः सा केशिनी गत्वा दमयन्त्यै न्यवेदयत्।

तत्सर्वं कथितं चैव विकारं चैव तस्य तम्॥ ३-७२-३०॥